Sl.No. : 0296010

नामांक Roll No.

| 1 | 3 | 7 | 4 | 9 | 5 | 5 |
|---|---|---|---|---|---|---|

No. of Questions – 23

No. of Printed Pages – 11

S-71-Sanskritam (T.L.)

यहाँ से काटिए

# माध्यमिक परीक्षा, 2023

# SECONDARY EXAMINATION, 2023

## तृतीय भाषा – संस्कृतम्

समय : 3.15 (सपादहोरात्रयम्)

पूर्णाङ्क : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

Avinashmodi.in

**परीक्षार्थिभ्यः सामान्यनिर्देशाः :**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

1206

## खण्ड – अ

वस्तुनिष्ठप्रश्नाः –

प्र.1) अधोलिखित वाक्ययोः रेखाङ्कित पदयोः प्रसंगानुकूलम् उचितार्थं चित्वा लिखत –

i) भ्रातरावावां सोदर्यौ । [1]

अ) सहोदरौ ब) मित्रे
स) छात्रौ द) पितरौ

ii) आर्य! अलीकम् एतत् । [1]

अ) स्वगतम् ब) समीपम्
स) असत्यम् द) सत्यम्

प्र.2) i) ''धूमं मुञ्चति'' इति पदस्य सन्धिविच्छेदं कृत्वा सन्धे : नामापि लिखत – [1]

अ) धूमङ् + मुञ्चति (अनुस्वारः) ब) धूमञ् + मुञ्चति (अनुस्वारः)
स) धूमम् + मुञ्चति (अनुस्वारः) द) धूमन् + मुञ्चति (जश्त्वम्)

ii) ''अन्तर्जगति'' इत्यस्य सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत – [1]

अ) अन्तः + जगति (रुत्वम्) ब) अन्तस् + जगति (सत्वम्)
स) अन्त + जगति (लोपः) द) अन्त + र्जगति (उत्वम्)

iii) 'सत् + चित्' इत्यस्य सन्धिं कृत्वा सन्धेः नामापि लिखत – [1]

अ) सद्चित् (जश्त्वम्) ब) सच्चित् (श्चुत्वम्)
स) सञ्चित् (अनुस्वारः) द) सज्चित् (श्चुत्वम्)

iv) 'हरिः + त्राता' इत्यस्य सन्धिं कृत्वा सन्धेः नामापि लिखत – [1]

अ) हिरष्त्राता (उत्वम्) ब) हरिर्त्राता (रुत्वम्)
स) हरिस्त्राता, (सत्वम्) द) हरित्राता (लोपः)





प्र.3) i) 'नावसीदति' इत्यत्र उपसर्गं शब्दं च पृथक्कृत्वा लिखत – [1]

अ) नावसीद + ति ब) न + अव + सीदति
स) नावसी + दति द) नाव + सीदति

ii) 'निरर्थकम्' इत्यस्य उपसर्गं शब्दं च पृथक्कृत्वा लिखत – [1]

अ) निस् + अर्थकम् ब) निः + अर्थकम्
स) निर् + अर्थकम् द) नि + अर्थकम्

प्र.4) अधोलिखितम् अपठितगद्यांशं पठित्वा एतदाधारित प्रश्नानां यथानिर्देशम् उत्तराणि लिखत –

मानव जीवनस्य साफल्यं त्यागेनैव भवितुमर्हति, न तु भोगेन । पाश्चात्त्या संस्कृतिर्हि सर्वथा उपभोगसंस्कृतिः सर्वान् भोगमेव शिक्षयति । भारतीया संस्कृतिस्तु सर्वथा आध्यात्मिकी, भोग स्थाने योगमेव शिक्षयति । पाश्चात्त्या सभ्यता खलु परेषां भागं हर्तुमपि संकोचं न अनुभवति । भारतीयसभ्यता पुनः परेषाम् उपकाराय निजस्वार्थान् त्यक्तुं प्रेरयति । त्यागो हि अस्याः एको महामन्त्रः येन विश्वकल्याणं भवितुमर्हति । भारतीया हि संस्कृतिः परेषां कल्याणं मनुते, परेषां कार्यसिद्धये स्वकीयस्वार्थत्यागः करणीय इति उपदिशति इयमेव त्यागभावना गीतायामपि प्रकटिता । वैदिक महर्षिभिस्तु बहुकालं पूर्वमेवत्यागस्य महिमा उद्घोषितः ''तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्'' ।

क) निर्देशानुसारं प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत –

i) 'करणीयः' इत्यस्य क्रियापदस्य गद्यांशे कर्तृपदमस्ति – [1]

अ) कार्यसिद्धये ब) स्वार्थत्यागः
स) परेषाम् द) कल्याणम्

ii) 'आध्यात्मिकी' इतिविशेषणपदस्य गद्यांशात् विशेष्यपदं चित्वा लिखत – [1]

अ) भारतीया संस्कृतिः ब) गीता
स) सर्वथा द) भोगः

iii) 'अस्याः' इति सर्वनामपदस्थाने संज्ञापदं लिखत – [1]

अ) जीवनस्य ब) त्यागस्य
स) भारतीय सभ्यतायाः द) भावना

iv) 'असाफल्यम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत – [1]

अ) संस्कृतिः ब) कल्याणम्
स) सफलम् द) साफल्यम्

Avinashmodi.in

ख) एकपदेन उत्तरत – [2 × 1 = 2]

i) गीतायां का भावना प्रकटिता?

ii) भारतीया संस्कृतिः किं मनुते?

ग) पूर्णवाक्येन उत्तरत – [2 × 1 = 2]

i) भारतीय सभ्यता कस्मै प्रेरयति?

ii) भारतीय संस्कृतिः किं शिक्षयति?

घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । [1]

ङ) उपर्युक्त गद्यांशस्य संक्षिप्तीकरणं कुरुत । [1]

## खण्ड – ब

प्र.5) अधोलिखितरेखांकितपदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत – [1+1+1=3]

i) सेवितव्यो महावृक्षः ।

ii) को भेदः पिकस्य च काकस्य च ।

iii) विमूढधीः पुरुषः अपक्वं भुङ्क्ते ।

प्र.6) अधोलिखितवाक्येषु रेखांकितपदानां विभक्तिं त त् कारणं च लिखत – [1+1+1+1=4]

i) जलं विना जीवनं न सम्भवति ।

ii) मृगाः मृगैः सङ्गमनुव्रजन्ति ।

iii) वनस्य समीपे नदी वहति ।

iv) जनानां कृते मम सत्यप्रियता अस्ति ।





प्र.7) कोष्ठके प्रदत्त–प्रकृतिप्रत्ययाभ्यां पदं निर्माय वाक्यं पूरयत तथा रेखांकितपदं पृथक् कृत्वा लिखत – [1+1+1=3]

i) अत्यादरः ......... । (शङ्क् + अनीयर्)

ii) महाकम्पनं जनयति ।

iii) समत्वम् इति तथ्यतः ।

प्र.8) मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत – [1+1+1=3]

(तत्र, अपि, सर्वत्र)

i) वर्षाकाले ....... जलोपप्लवः भवति ।

ii) .......... कुशलं महाराजस्य ।

iii) योजकः .......... दुर्लभः ।

Avinashmodi.in

प्र.9) क) कोष्ठ केषु प्रदत्तेषु पदेषु यथानिर्दिष्टां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत – [1 + 1 = 2]

i) ............ यमलौ । (अस्मद् शब्दस्य प्रथमा–द्विवचनम्)

ii) ............. नमः । (गुरु शब्दस्य चतुर्थी–एकवचनम्)

ख) कोष्ठकेषु प्रदत्तेषु धातुषु निर्देशानुसारं रुपाणि विधाय रिक्तस्थानानि पूरयत – [1 + 1 = 2]

i) युवां कलहं ............ ।

(कृधातु – लट्लकार – म.पु. द्विवचनम्)

ii) गुरोः छात्राः ज्ञानं ............ ।

(लभ्धातु – लट्लकार – प्र.पु. बहुवचनम्)

प्र.10) अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत – [1 + 1 = 2]

i) 130

ii) 445

## खण्ड – स

प्र.11) अ) अधोलिखितेषु सप्तसु चतुर्णां प्रश्नानां संस्कृते उत्तराणि एकपदेन लिखत – [4 × ½ = 2]

i) कः पिपासितः म्रियते?

ii) चाणक्यः मणिकार श्रेष्ठिनं कं द्रष्टुम् इच्छति?

iii) भूकम्प विभीषिकापाठानुसारं फालद्वये विभक्ता का?

iv) आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात्?

v) चौरस्य पादध्वनिना कः प्रबुद्धः?

vi) न्यायाधीशस्य नाम किम्?

vii) अगाधजलसञ्चारी कः गर्वं न याति?

आ) अधोलिखितेषु सप्तसु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृते पूर्णवाक्येन लिखत – [4 × 1 = 4]

i) केषां माला रमणीया?

ii) बुद्धिमती कुत्र व्याघ्रं ददर्श?

iii) सुभाषितपाठानुसारं कुत्र सख्यं भवति?

iv) केन सम्बन्धेन वाल्मीकिः लवकुशयोः गुरुः?

v) 'जननी तुल्यवत्सला' पाठः कस्मात् ग्रन्थात् गृहीतः?

vi) वसन्तस्य गुणं कः वेत्ति?

vii) परस्परविवादितः केषां हानिः जायते?





प्र.12) अधोलिखितवाक्येषु रेखांकितपद माधृत्य प्रश्ननिर्माणं कुरुत – [1+1+1=3]

i) <u>वनराजपदाय</u> सुपात्रं चीयते?

ii) <u>तस्याः</u> द्वे नामनी ।

iii) <u>सुराधिपः</u> ताम् अपृच्छत् ।

प्र.13) अधोलिखितश्लोकस्य अन्वयं लिखत – [2]

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम् ॥

Avinashmodi.in

प्र.14) स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात् । [1 + 1 = 2]

प्र.15) अधोलिखितस्य पद्यांशस्य संस्कृते भावार्थः लेखनीयः – [2]

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।
वाष्पयानमाला संधावति वितरन्ती ध्वानम् ॥

अथवा

शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा ॥

प्र.16) "बुद्धिर्बलवती सदा" इति पाठस्य सारं हिन्दीभाषायां लिखत – [2]

## खण्ड – द

**प्र.17)** क्रमरहितानां षड्वाक्यानां क्रमपूर्वकं संयोजनं कुरुत – [3]

i) परं तथापि द्राक्षाफलानि न प्राप्नोत् ।

ii) एकस्मिन् स्थाने सः द्राक्षालताम् अपश्यत् ।

iii) तानि खादितुं सः नैकवारं प्रयासम् अकरोत् ।

iv) एकः बुभुक्षितः शृगालः भोजनार्थं वने इतस्ततः भ्रमतिस्म ।

v) "एतानि द्राक्षाफलानि अम्लानि" इति कथयित्वा कुपितः शृगालः ततः पलायितः ।

vi) लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्

अथवा

मञ्जूषायां प्रदत्तेषु पञ्चशब्देषु केषाञ्चित् त्रयाणां शब्दानां सहायतया वाक्यानि रचयत ।

| |
|---|
| पुरतः, सह, नमः, अस्माकम्, यदि – तर्हि |

**प्र.18)** अधोलिखितेषु वाक्येषु केषांचन त्रयाणां वाक्यानां संस्कृतभाषया अनुवादं कुरुत – [3]

i) केशव धीरे धीरे लिखता है ।

ii) रमेश ने आज नहीं पढ़ा ।

iii) राजा राज्य की रक्षा करता है ।

iv) हम दोनों पाठशाला जाते हैं ।

v) तुम सब ईश्वर को प्रणाम करते हो ।

vi) वे सब संस्कृत बोलते हैं ।





**प्र.19)** भवान् राजकीय – उच्चमाध्यमिक – विद्यालय – गोविन्दनगरस्य दशम्याः कक्षायाः छात्रः सोमदत्तः अस्ति । भवतः भगिनीविवाहः अस्ति । अतः स्व प्रधानाचार्याय दिनद्वयस्य अवकाशार्थं प्रार्थनापत्रं लिखतु । [4]

अथवा

भवती लक्ष्मीः अस्ति । स्वकीयां सखीं प्रति संस्कृतदिवसविषये अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत –

(रक्षाबन्धन दिवसे, संस्कृतदिवसम्, मह्यम् भाषणम्, गीतम्, संस्कृतभाषा नमस्ते कुशलम् )

प्रिय सखि सीते !

सादरं (i).............. ।

अत्र (ii)............ तत्रास्तु । समग्रदेशे (iii)................. संस्कृत दिवसः परिपाल्यते । वयमपि तदा विद्यालये (iv).............. पालयामः । अहमपि संस्कृतदिवसे संस्कृतं (v).............. गायामि । मम सखी संस्कृते (vi)............. ददाति । एषा (vii)................. सर्वभाषाजननी अस्ति । अतः (viii)................. संस्कृतं रोचते ।

अस्तु नमोनमः

भवदीया सखी

लक्ष्मीः

Avinashmodi.in

**प्र.20)** अधोलिखितस्य पठितगद्यांशस्य हिन्दी भाषायां सप्रसंगम् अनुवादं लिखत – [4]

वनस्य दृश्यं समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति । क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारुढः । तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षो–परि आरोहति ।

अथवा

भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृ[...] तामपृच्छत् – "अयि शुभे ! किमेवं रोदिषि?"

"भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।"

प्र.21) अधोलिखितस्य पठितपद्यांशस्य हिन्दीभाषायां सप्रसंगम् अनुवादं लिखत – [4]

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः ।

अथवा

संपत्तौ च विपत्तौ च महतामेकरुपता ।

उदये सविता रक्तो रक्तश्चास्तमये तथा ।।

प्र.22) अधोलिखितस्य नाट्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं लिखत – [4]

विदूषकः – अहं पुनः पृच्छामि । किं नामधेया युवयोर्जननी ।

लवः – तस्याः द्वे नामनी ।

विदूषकः – कथमिव ।

लवः – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति ।

रामः – अपि च इतस्तावद् वयस्य । मुहूर्त्तमात्रम् ।

अथवा

चन्दनदासः – अत्यादरः शङ्कनीयः । अथ किम् । आर्यस्य प्रसादेन अखण्डिता मे वणिज्या ।

चाणक्यः – भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः ।

चन्दनदासः – आज्ञापयतु आर्यः किं कियत् च अस्मज्जनादिष्यते इति ।





प्र.23) अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि निर्माय लिखत –[8 × ½ = 4]

| खगाः, विकसन्ति, कमलानि, उदेति, क्रीडन्ति, सूर्यः, डयन्ते, चित्रपतङ्गा कूजन्ति, बालाः |
|---|



अथवा

मञ्जूषातः उपयुक्तपदानि चित्वा मित्रद्वयस्य वार्तालापं पूरयत –

| नमोनमः, जन्मदिनम्, मिलावः, कुशली, आगमिष्यामि, भवतः, स्वास्थ्यम्, कथम् । |
|---|

गोविन्दः – भो मित्र गोपाल ! सुप्रभातम्

गोपालः – (i)............... ।

गोविन्दः – भवान् (ii)............ अस्ति ।

गोपालः – अहं (iii).......... अस्मि ।

गोविन्दः – श्वः मम (iv).............. भविष्यति । कृपया आगच्छतु ।

गोपालः – अस्तु अहं श्वः (v)........... ।

गोविन्दः – (vi).......... भगिनीम् अपि आनयतु ।

गोपालः – तस्याः (vii)........... सम्यक् नास्ति ।

गोविन्दः – भवान् आगच्छतु ।

गोपालः – अस्तु, आवां पुनः (viii)...............।

Avinashmodi.in

DO NOT WRITE ANYTHING HERE

Avinashmodi.in